# Bilvavriksha Mahimnavarnanam

# બિલ્વવૃક્ષમહિમ્નવર્ણનમ્

## Document Information

Text title : Bilvavriksha Mahimnavarnanam

File name : bilvavRRikShamahimnavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 22| 59-74 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# બિલ્વવૃક્ષમહિમ્નવર્ણનમ્

મહાદેવસ્વરૂપોઽયં બિલ્વો વેદૈરપિ સ્તુતઃ ।
યથાકથઞ્ચિદેતસ્ય મહિમા જ્ઞાયતે કથમ્ ॥ ૧॥

વનમેતત્ પાવનં ચ બિલ્વેનાનેન કેવલમ્ ।
એતદ્વાતાનુષઙ્ગેન લિઙ્ગમઙ્ગં પ્રજાયતે ॥ ૨॥

પુણ્યતીર્થાનિ યાવન્તિ લોકેષુ પ્રથિતાન્યપિ ।
તાનિ સર્વાણિ તીર્થાનિ બિલ્વમૂલે વસન્તિ હિ ॥ ૩॥

બિલ્વમૂલજલૈર્યસ્તુ મૂર્ધાનમભિષિઞ્ચતિ ।
સ સર્વતીર્થસ્નાતઃ સ્યાત્ સ એવ ભુવિ પાવનઃ ॥ ૪॥

બિલ્વમૂલે મહાદેવં લિઙ્ગરૂપિણમવ્યયમ્ ।
યઃ પૂજયતિ પુણ્યાત્મા સ શિવં પ્રાપ્નુયાત્ ધ્રુવમ્ ॥ ૫॥

બિલ્વમૂળે પ્રજપ્તાસ્તુ મન્ત્રાઃ સિદ્ધિમુપાગતાઃ ।
તન્મન્ત્રમહિમા તાવત્ જ્ઞાયતે શઙ્કરેણ હિ ॥ ૬॥

શક્તિહીનોઽપિ યો મન્ત્રો બિલ્વમૂલેષુ જપ્યતે ।
સ સિદ્ધઃ સકલં દદ્યાત્ યદિ માહેશ્વરપ્રિયઃ ॥ ૭॥

બિલ્વરૂપં સમાસાદ્ય શિવ એવં સ્વયં પ્રભુઃ ।
લોકાનામુપકરાય વનેઽસ્મિન્નધિતિષ્ઠતિ ॥ ૮॥

એતસ બિલ્વમૂલસ્યાપ્યાલવાલમનુત્તમમ્ ।
જલાકુલં મહાદેવો દૃષ્ટ્વા તુષ્ટો ભવિષ્યતિ ॥ ૯॥

ગન્ધપુષ્પાદિભિઃ સર્વૈરુપચારૈઃ પ્રયત્નતઃ ।
યો બિલ્વં પૂજયેદ્ભક્ત્યા સન્તતિસ્તસ્ય વર્ધતે ॥ ૧૦॥

દીપમાલાં બિલ્વમૂલે યઃ કલ્પયતિ સાદરમ્ ।
સ તત્ત્વજ્ઞાનસમ્પન્નો મહેશાન્તર્ગતો ભવેત્ ॥ ૧૧॥

પ્રદક્ષિણનમસ્કારાન્ બિલ્વમૂલે પ્રયત્નતઃ ।
તે પાપપર્વતાનાં નાશકાઃ સ્યુર્ત સંશયઃ ॥ ૧૨॥

નમસ્કાર્યત્વબુદ્ધ્યા યઃ પ્રણતો દણ્ડવદ્ભુવિ ।
તસ્માત્ પતન્તિ પાપાનિ નોત્તિષ્ઠન્તિ કદાચન ॥ ૧૩॥

બિલ્વશાખાં સમાદાય હસ્તેન નવપલ્લવમ્ ।
ગૃહીત્વા પૂજયેદ્બિલ્વં તેન પાપૈઃ પ્રમુચ્યતે ॥ ૧૪॥

બિલ્વમૂલે શિવરતં ભોજયેદ્યસ્તુ ભક્તિતઃ ।
એકં વા કોટિગુણિતં તસ્ય પુણ્યં પ્રજાયતે ॥ ૧૫॥

બિલ્વમૂલે ક્ષીરયુક્તમન્નમાજ્યેન સંયુતમ્ ।
યો દદ્યાચ્છિવભક્તાય સ દરિદ્રો ન જાયતે ॥ ૧૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે બિલ્વવૃક્ષમહિમ્નવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૨૨। ૫૯-૭૪ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 22. 59-74 ..

Proofread by Ruma Dewan

*Bilvavriksha Mahimnavarnanam*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*